International Journal of Sanskrit Research 2024; 10(4): 310-313

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(4): 310-313
© 2024 IJSR
www.anantaajournal.com
Received: 08-06-2024
Accepted: 13-07-2024

**रामदण्डपाट**
विद्यासागर विश्वविद्यालय, मिदनापुर,
पश्चिम बंगाल, भारत

**डॉ. उत्तम-विश्वासश्च**
विद्यासागर विश्वविद्यालय, मिदनापुर,
पश्चिम बंगाल, भारत

**Corresponding Author:**
**रामदण्डपाट**
विद्यासागर विश्वविद्यालय, मिदनापुर,
पश्चिम बंगाल, भारत

# कालिदासस्य महाकाव्यद्वये प्रयुक्तासु उपमासु सांख्ययोगतत्त्वविमर्शः

**रामदण्डपाट, डॉ. उत्तम-विश्वासश्च**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i4e.2464

## प्रस्तावना

‘‘अपारे काव्यसंसारे कविरेक: प्रजापति:।
यथास्मै रोचते विश्वं तथा वै परिवर्तते।।’’[1]

सर्वे खलु मनुष्याः कवीनां महत्या सृष्ट्या समृद्धा भवेयुः। अस्माकं समुद्रवत् संस्कृतसाहित्यजगति अनेके कवय: सन्ति ये तावत् स्वगरिम्ना नितरां विराजन्तेतराम्। एतेषु कविषु विद्वत्प्रवर: शास्त्रज्ञ: कविकुलगुरु: कालिदास: श्रेष्ठस्थानं भजते। विश्वस्मिन्नस्मिन् ईदृश: न कोऽपि साहित्यानुरागी स्यात् य: कालिदासस्य काव्यकलासु अपरिचितोऽस्ति। महाकवेरस्य साहित्यं रसभावभाषाशैलीदृष्ट्या सर्वोत्कृष्टं वर्तते। उपमाप्रयोगे कालिदास: सर्वान् कविवरान् अतिशेते। तस्मात् तस्य विषये एका सुक्ति: सर्वदा प्रचलिता अस्ति —

**‘उपमा कालिदासस्य’**
‘उपमा’ शब्दस्य साधारणार्थो भवति तुलना सादृश्यं वा। सादृश्यमवलम्व्य येषाम् अलंकाराणां सृष्टि: ते सर्वे अलंकाराः सामान्यतः नाम्ना उपमेति गीयन्ते। आलंकारिक: अप्पयदीक्षित: तस्मात् उवाच-

‘‘उपमैका शैलुषी संप्राप्ता चित्रभूमिकाभेदान्।’’[2]

अर्थात् उपमेति एकैव नटी विचित्रभूमिकायामंशग्रहणं करोति काव्यस्य रङ्गमञ्चे, रसिकजनानां चित्तरञ्जनमपि करोति। विचित्रभूमिकासु नटीवदाचरति अयं विशेषलक्षणयुक्तः उपमा नामालंकार:। अपरे केचन सादृश्यमूलका अलंकारा: अपि उपमाशब्देन गम्यन्ते यथा उत्प्रेक्षा, व्यतिरेक:, रूपकम्, अपह्नुति:, सन्देह:, भ्रान्तिमान् प्रभृतय:। सादृश्यमूलकानाम् अलंकाराणां प्रकारभेद: नाम साधारणोपमाया: चित्रभूमिकाभेद:।
‘उपमा कालिदासस्य’ प्रशस्तिरियं यद्यपि महाकविं कालिदासं प्रति यथार्थतया प्रयुक्ता तथापि अनया प्रशस्त्या कालिदासस्य सर्वतोमुखी-प्रतिभाया: आंशिकग्रहणं भवति। प्रशस्तिमाध्यमेन उच्यते यत् महाकवि: कालिदास: केवलं ‘उपमा’ अलंकारस्य प्रयोगे सुदक्ष: आसीदिति । किन्तु ‘उपमा कालिदासस्य’ इत्यत्र उपमाशब्द: लाक्षणिकार्थे प्रयुक्तः इति विविच्यते चेत् तत्र अधिकार्थो लब्धुं शक्यते। अतः उपमाशब्देन अत्र केवलम् उपमा अलंकार: न बोध्यते अपि तु रूपकं, उत्प्रेक्षा, निदर्शना, दृष्टान्त:, अर्थान्तरन्यास:, उल्लेख: प्रभृतय: अलंकारा: बोध्यन्ते। केचित् समीक्षका: वदन्ति उपमा नाम उपमालंकार:, एवं केचित् वदन्ति उपमा नाम सादृश्यमूलक: अलंकार:। तथाहि उच्यते नाट्यशास्त्रे –

‘‘यत्किञ्चित्काव्यबन्धेषु सादृश्येनोपमीयते।
उपमा नाम सा ज्ञेया गुणाकृतिसमाश्रया।’’[3]

वस्तुत: कवेरुपमालंकारस्य विन्यास: यादृश: समुन्नतः आसीत् तदपेक्षया रूपकादीनामर्थालंकाराणां विन्यास: न क्वचित् न्यून:। महाकवि: कालिदास: संस्कृतानुरागिणां कृते रघुवंशम् कुमारसम्भवञ्चेति महाकाव्यद्वयं रचितवान्। महाकवि: कालिदास: तस्य स्वप्रतिभाबलेन काव्यरसिकानां कृते सुन्दरतया काव्यतत्त्वं उपस्थापितवान्। तस्य काव्यतत्त्वेषु विभिन्नानां शास्त्राणां सन्निवेश: परिलक्ष्यते।

कालिदासीयमहाकाव्यद्वये वेदस्य, व्याकरणशास्त्रस्य, कामन्दकीयनीतिशास्त्रस्य दर्शनशास्त्राणां च गूढतत्त्वं सन्निहितं विद्यते। इदानीम् एतेषु दर्शनशास्त्रविषयकं सांख्ययोगतत्त्वम् आलोच्यते अधस्तात्-

जगतः चरमसत्यमेव दुःखम् । सांख्यमते एतत् दुःखं त्रिविधम् –आध्यात्मिकम् आधिभौतिक आधिदैविकं चेति भेदेन। एतेषां दुःखानाम् आत्यन्तिकविनाशेन मुक्तिर्भवतीति सांख्यमतम्। लौकिकवैदिकोपायाभ्यां यद्यपि तेषां सामयिकविनाशः सम्भवति परन्तु आत्यन्तिकविनाशो न भवति। तस्मात् अस्य त्रिविधदुःख्यस्य आत्यन्तिकविनाशाय सांख्यदर्शने उपायः वर्णितः। दुःख्यस्य आत्यन्तिकविनाशस्योपायतया पञ्चविंशतितत्त्वानां ज्ञानं स्वीकृतम् । तानि तत्त्वानि भवन्ति –प्रकृतिः, महत्तत्त्वं, अहंकारः, एकादशेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चमहाभूतानि, पुरुषश्चेति। एतेषु तत्त्वेषु प्रकृतितः महत्तत्त्वस्य, महतः अहंकारतत्त्वस्य,अहंकारतः षडशकः गणः उत्पद्यते इति सांख्यनियमः।एवमेव जगतः सृष्टिक्रमः उपस्थपितः सांख्यैः। कालिदासेनापि तस्य काव्ये सांख्यदर्शनस्य अयं सृष्टिक्रमः उपमामुखेनोपस्थापितः। अस्य महाकाव्यस्य त्रयोदशसर्गे रावणवधानन्तरं सीतया सह रामचन्द्रस्य अयोध्याप्रत्यागमनं वर्णितम्। तत्र मार्गे सरयून्द्याः वर्णनावसरे कविनोक्तं यत् —

> ''ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाप्तमुदाहरन्ति''[4]

सांख्यदर्शने मोक्षलाभस्य उपायरूपेण प यथा- बुद्धेः कारणम् अव्यक्तं मूलप्रकृतिर्वा तथैव सरयून्द्याः कारणं मानससरोवरः। अत्र महाकविना उपमया सांख्यदर्शनस्य 'सृष्टिक्रमः उपस्थापितः। सांख्योक्तपञ्चविंशतितत्त्वेषु प्रथमं मूलप्रकृतिः अव्यक्तं वा। तस्य प्रथमः परिणामः महद् बुद्धिः वा। अर्थात् प्रकृतेः बुद्धिर्जायते। अतः बुद्धेः कारणं मूलप्रकृतिः भवति। तथैव सरयून्द्याः कारणं मानसं सरः इत्युपमया सांख्यदर्शनसिद्धान्तः कविना उपस्थापितः। तथाहि उच्यते सांख्यकारिकायाम्—

> ''प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोड़शकः।
> तस्मादपि षोड़शकात् पञ्चभ्यः पञ्चभूतानि॥''[5]

सांख्यदर्शने उक्तं दुःखस्य नाशे सति मोक्षलाभः भवेत् ।इदानीं प्रश्नो भवेत् दुःखस्य नाशःकेन भवेत् ? तदुत्तरे साख्यदर्शने उक्तं – दुःखस्य आत्यन्तिकविनाशः पञ्चविंशतितत्त्वेन भवति ।एतेषु पञ्चविंशतितत्त्वेषु अन्यतमा हि प्रकृतिः ।सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः अर्थात् सत्त्वादीनां गणानां संमिश्रणेन प्रकृतिः सञ्जाता ।कालिदासस्य महाकाव्येऽपि ईदृशी गुणविषयका वर्णना समुपस्थिता ।

रघुवंशस्य दशमे सर्गे दृश्यते यत् सर्वे देवाः रावणादीनां राक्षसानाम् अत्याचारात् विष्णोः शरणम् आगतवन्तः। तदा भगवान् विष्णुः देवान् प्रति उद्दिश्य उवाच - यथा सांसारिकजीवेषु सत्त्वरजोगुणौ तमोगुणेन आक्रान्तौ सन्तौ पराजयम् अनुभवतः तथैव रावणादीनां राक्षसानां पराक्रमेण देवा अपि पराजयं अनुभवन्ति। अत्र महाकविः कालिदासः उपमाप्रयोगेन तमोगुणेन सह रावणादीनां पराक्रमं उपस्थापितवान्। तथाहि उच्यते रघुवंशे —

> ''जाने वो रक्षसाऽक्रान्तावनुभावपराक्रमौ।
> अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ॥''[6]

अस्माकं संसारे मानवेषु तमोगुणस्य प्रभावः अधिकरूपेण दृश्यते। सांसारिकाः मानवाः सर्वदा अर्थकामौ प्रति प्रधावन्ति। तस्मात् तेषु मानवेषु तमोगुणस्य अधिकः प्रभावः परिलक्ष्यते। सांख्यकारिकायाम् उक्तम् यत् - ''गुरुवरणकमेव तमः।''[7] अर्थात् तमोगुणो भवति गुरुस्वभावयुक्तः,एवं वरणकः अर्थात् आवरणकः। तमोगुणेन शरीरस्य इन्द्रियाणाम् अन्तःकरणस्य च जडता आयाति ।

रघुवंशस्य अष्टमे सर्गे राज्ञः अजस्य वीरत्ववर्णनावसरे महाकविना कालिदासेन गुणत्रयस्य उपस्थापना कृता। महान् राजा अजः यथा सन्धिविग्रहादीनां सम्यग्रूपेण प्रयोगं चकार तथैव रघुरपि जिगाय। तदुक्तम् —

> ''पणबन्धमुखान्गुणानजः षडुपायुङ्क्त समीक्ष्य तत्फलम्।
> रघुरप्यजयद् गुणत्रयं प्रकृतिस्थः समलोष्टकाञ्चनः॥''[8]

नवनरपतिः अजः फलयोगं विविच्य सन्धिविग्रहादीन् षट्गुणान् प्रयुक्तवान् । रघुरपि लोष्ट्रकाञ्चनौ प्रति समदृष्टिसम्पन्नः भूत्वा संयतचित्तेन सत्त्वादिगुणान् जितवान् । गुणत्रयस्य स्वरूपप्रसङ्गे ईश्वरकृष्ण उवाच —

> ''प्रीत्यप्रीतिविषादात्मकाः प्रकाशाप्रवृत्तिनियमार्थाः।
> अन्योऽन्याभिभवाश्रय जननमिथुनवृत्तयश्च गुणाः॥''[9]

प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः अप्रीतिर्दुखं अप्रीत्यात्मको रजोगुणः विषादो मोहः विषादात्मकस्तमोगुणः इत्यर्थः। राजा रघुः गुणत्रयं जितवान् तस्मात् सः सम्यग्रूपेण राज्यं परिचालयितुं शशाक ।

रजोगुणस्य प्रभावविषये अस्य महाकाव्यस्य नवमे सर्गेऽपि ओलाचना परिलक्ष्यते। सांख्यदर्शने रजोगुणस्य क्रियाविषये ओलाचना अस्ति। तत्र उक्तं यत् —

> ''सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः।''[10]

रजोगुणः चञ्चलस्वभावयुक्तः। रजोगुणस्य कारणात् मानवानां मनसि चञ्चलता जायते। ते सम्यग्रूपेण कार्यस्य सम्पादनं कर्तुं न शक्नुवन्ति। तस्मात् तेषां जीवने दुःखम् आवर्तते।

अनुरूपभावेन रघुवंशस्य नवमसर्गेऽपि दशरथेन गजवधः कृतः परन्तु इदं कार्यम् अनुचितम् इति शास्त्रे कथितम्। क्वचित् विद्वान् अपि गुणत्रयस्य प्रभावात् अनुचितं कार्यं करोति। दशरथोऽपि अनुचितं शास्त्रविरुद्धं कार्यं चकार। अत्र दशरथेन सह विदुषाम् एवं दशरथस्य अनुचितकार्येण सह रजोप्रभावितकार्यस्य तुलना कृता । तथाहि उक्तं रघुवंशे —

> ''नृपतेः प्रतिषिद्धमेव तत्कृतवान् पङ्क्तिरथो विलङ्घ्य यत्।
> अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः॥''[11]

अस्मिन् श्लोके राज्ञः दशरथस्य शास्त्रविरुद्धं कार्यम् उल्लिखितम् । शास्त्रे उक्तं क्षत्रियस्य कृते गजवधः निषिद्धकार्यम् । तथापि राजा दशरथः ईदृशं शास्त्रीयं नियमम् अलङ्घत् । यतः विद्वांसोऽपि रजगुणावृताः सन्तः कुमार्गे परिचालिताः भवन्ति । अस्मिन् प्रसङ्गे मल्लिनाथेनापि सञ्जीवनीटीकायाम् उक्तम् —

> ''श्रुतवन्तोऽपि विद्वांसोऽपि राजोनिमीलिता रजोगुणावृताः सन्तः न पन्था इत्यपथम्।''[12]

'कुमारसम्भवम्' महाकाव्यस्य द्वितीये सर्गे सांख्यदर्शनस्य एकं महत्त्वपूर्णं तत्त्वं कालिदासेन उद्घाटितम्। तथाहि उच्यते ब्रह्मसाक्षात्कारे —

> ''त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम्।
> तद्दर्शितमुदासीनं त्वामेव पुरुषं विदुः॥''[13]

सांख्यदर्शने 'प्रकृतिः' 'पुरुष' इति शब्दद्वयं यथाक्रमं मूलकारणम् परमात्मारूपेण परिचीयते। सांख्यनये प्रकृतिरेव विश्वस्य मूलम् । पुरुषः जगत्सृष्टौ अंशग्रहणं न करोति, उदासीनरूपेण केवलं पश्यति। जगतः मूलकारणं प्रकृतिः। अस्मिन् श्लोकेऽपि कालिदासेन उल्लेखालंकारेण सूचितं यत् ब्रह्मा प्रकृतिरूपेण तथा पुरुषरूपेण आविर्भवति। सांख्यदर्शनस्य प्रधानतत्त्वद्वयमस्ति — प्रकृतिः पुरुषश्चेति। प्रकृतिः भवति मूलकारणम्। पुरुषो भवति परमात्मा । तथाहि सांख्यकारिकायाम् उक्तम् —

> ''तस्माच्च विपर्यसात् सिद्धं साक्षित्वमस्य पुरुषस्य ।
> कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च॥''[14]

तस्मात् त्रिगुणादेः यो विपर्यासः स पुरुषस्य त्रिगुणरहितत्वं, विवेकित्वं, अविषयत्वं, असाधारणत्वं, चेतनत्वं, अप्रसवधर्मित्वञ्च। तत्र चेतनत्वेन अभिषवत्वेन च साक्षित्वद्रष्टृत्वेदर्शिते चेतन हि द्रष्टा भवति, नाचेतनः।

भारतीयास्तिकदर्शनसम्प्रदायेषु योगदर्शनं हि अन्यतमम्। योगदर्शने संयमीपुरुषस्य वर्णना परिलक्ष्यते। संयमी पुरुषः इन्द्रियनामकान् रिपून् जेतुं तत्त्वज्ञानस्य अवलम्बनं करोति । कालिदासस्य रघुवंशेऽपि योगशास्त्रसम्मतं तत्त्वमिदम् उपस्थापितं महाकविना। अस्य महाकाव्यस्य चतुर्थे सर्गे परिलक्ष्यते यत् महाराज: रघु: तस्य पराक्रमेण रिपुन् पराजितवान्। स रिपून् पारसीकान् जेतुं स्थलवर्त्मना प्रतस्थे यथा संयमी योगीपुरुष: तत्त्वज्ञानेन इन्द्रियाणि जेतुं शक्नोति। अत्र उपमाप्रयोगे कालिदासस्य कौशलं दर्शनीयम्। अस्मिन् श्लोके उपमेय भवति योगीपुरुष:। रघुना सह संयमीपुरुषस्य तुलना कृता महाकविना कालिदासेन। तथाहि उक्तं रघुवंशे —

''पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी।।''[15]

अस्मिन् विषये मल्लिनाथेन संजीवनीटीकायाम् उक्तम् —

''संयमी योगी तत्त्वज्ञानेनेन्द्रियाख्यानिन्द्रियनामकान् रिपुनिव पारसीकान् राजा जेतुं स्थलवर्त्मना तस्थे।।''[16]

योगदर्शने अष्टयोगाङ्गानां वर्णना प्राप्यते। तथाहि उक्तं योगसूत्रे – ''यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि।'' तेषु योगाङ्गेषु आसनं हि अन्यतमम्। आसनस्य लक्षणे पतञ्जलिना उक्तम् –"स्थिरसुखमासनम् ।"[17] अर्थात् निश्चलरूपेण सुखोजनकरूपेण च उपवेशनं भवति आसनम् । मनःसंयोगस्य बहुविधाः अवस्थाः विद्यन्ते । तस्मात् योगसूत्रे त्रयोदश आसनानां वर्णना प्राप्यते । तानि भवन्ति - पद्मासनम्, वीरासनम्, भद्रासनम्, स्वस्तिकम्, सोपाश्रयम्, पर्यङ्कम्, क्रौञ्चनिषदनम्, हस्तिनिषदनम्, उष्ट्रनिषदनम्, समसंस्थानम्, स्थिरसुखम्, यथासुखञ्च इत्यादीनि । एतेषां योगाङ्गानां परस्परसापेक्षत्वम् अस्ति । सर्वादौ पद्मासनं करणीयम् । कथम् ? कोऽपि यदि आदौ उष्ट्रनिषदनम् करोति तेन इष्टसिद्धिः न भवति । तस्मात् क्रमानुसारं मन्दं मन्दं आसनानि करणीयानीति ।
महाकविना कालिदासेनापि उत्प्रेक्षालंकारमाध्यमेन 'कुमारसम्भवम्' महाकाव्यस्य तृतीये सर्गे महादेवस्य वीरासनस्य वर्णना योगशास्त्रानुसारं उपस्थापिता । तथाहि ---

''पर्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं संनमितोभयांसम्।
उत्तानपाणिद्वयसन्निवेशात् प्रफुल्लराजीधमिवाङ्कमध्ये।।''[18]

अस्य श्लोकस्य अर्थो भवति - पर्यङ्कबन्धस्थिरपूर्वकायं ऋज्वायतं सन्नमितोभयांसम् उत्तानपाणिद्वयसन्निवेशात् अङ्कमध्ये प्रफुल्लराजीवम् इव स्थितं ददर्श । पर्यङ्कबन्धेनेन स्थिरपूर्वकायं अर्थात् वीरासनेन निश्चलोत्तरार्धम् ऋजुरायतश्चज्वयितस्तं संमिताबुभावंसौ यस्य तम् उक्तम् । उत्तान ऊर्ध्व तलो यः पाणिद्वयस्य संन्निवेशः संस्थानं तस्मात् अङ्कमध्ये प्रफुल्लं यस्य तमिव दृष्टवान् ।
अस्मिन् श्लोके वीरासनस्य वर्णना प्राप्यते। वीरासने स्थित: महादेव: प्रस्फुटितपद्मवत् प्रतीयते। तस्य शरीरस्य उत्तरार्धः निश्चलः ऋजुश्च स्कन्धद्वयं समुन्नतम् एवं हस्तद्वयं क्रोडमध्ये स्थितम् । अत्र 'पर्यङ्क' इत्यनेन 'वीरासनम्' बोध्यते। वीरासनकाले योगिनःकीदृशी अवस्था जायते तद्विषये सञ्जीवनीटीकायां मल्लिनाथेन उक्तम् यत्—

''एकं पादमथैकस्मिन्विन्यस्योरौ तु संस्थितम्
इतरास्मिंस्तथैवोरुं वीरासनमुदाहृतम्।।''[19]

इतोऽपि योगसारेऽपि उक्तम् —

''उत्तानिते करतले करमुत्तानितं परम्।
आदायाङ्कगतं कृत्वा ध्यायेद्यस्तस्य सोऽन्तरम्।।''[20]

संख्यदर्शनवत् योगदर्शनेऽपि प्रकृतिः पुरुषश्चेति नित्यं तत्त्वद्वयम् अस्ति । प्रकृतेः वुद्धितत्त्वम् उत्पद्यते । पुरुषः हि असङ्गः,चेतनो निष्क्रियश्च जडानां बुद्धौ सुखदुःखादयः वर्तन्ते, सुखदुःखादीनाम् अभावोऽपि बुद्धेः एव भवति । यदा पुरुषः अविद्यावशात् बुद्धितत्त्वेन सह तादात्म्यम् अनुभवति तदा बुद्धिगतानि सुखदुःखानि उपभुञ्जानः बद्धो भवति । यदा सः पुरुषः बुद्ध्या स्वस्य भेदं जानाति तदा बुद्धिगतसुखदुःखानि नानुभवति । पुरुषः तदा स्वस्वरूपे प्रतिष्ठितो भवति, मुक्तिश्च सञ्जायते । पुरुषो नित्यमुक्तः,तस्य स्वस्वरूपे स्थितिः एव मोक्षः । मोक्षे कारणं च बुद्धिपुरुषविवेकज्ञानम्। तदेव सत्त्वपुरुषान्यथाख्यातिः सदसत्ख्यातिः विवेकधीः इत्यादिपदैः उच्यते । अस्याः विवेकख्यातेः कारणरूपेण अष्टाङ्गयोगस्य निरूपणं विधीयते योगशास्त्रे । एतैः अष्टयोगाङ्गैः विवेकख्यातिः जायते एवम् अशुद्धेः अपसारणं भवति ।तथाहि योगसूत्रे –

"योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ।"[21]

योगिपुरुषः एतैः यमनियमप्रभृतिभिः उपायैः मनः शुष्कं कृत्वा सर्वं सांसारिकं अभिलाषं परित्यज्य समाधिं प्राप्नोति ।महाकविः कालिदासोऽपि कुमारसम्भवस्य सप्तदशसर्गे तारकासुरं प्रति कार्तिकेयस्य युद्धवर्णनाकाले ईदृशं योगतत्त्वम् उपस्थापितवान् ---

"देवोऽपि दैत्यविशिखप्रकरं सचाप वाणैःचकर्त कणशो रणकेलिकारी ।
योगीव योगविधिर्शुष्कमना यमाद्यै: सांसारिकं विषयो सङ्घममघो-वीर्यम् ।।"[22]

महादेवपुत्रः कार्त्तिकेयः देवानां रक्षार्थं तारकासुरेण सह युयोध । युद्धक्षेत्रे रणकेलिकारी कुमारः कार्त्तिकेयः स्वस्य वाणेन शत्रुरूपस्य तारकासुरस्य शरान् विनष्टवान्, यथा योगीपुरुषः यमनियमादिवाणेन सांसारिकम् अभिलाषं विनाशयति ।
रघुवंशस्य दशमे सर्गे भगवत: विष्णो: महत्त्ववर्णनावसरे सांख्यतत्त्वम् उपस्थापितं महाकविना कालिदासेन। तदुक्तम् –

''रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रिय:।।''[23]

अर्थात् यथा मधुरैकरसं दिव्यं वर्षोदकं देशे देशे पतित्वा रसवालारूपेण परिचीयते तथा च प्रकृतिपुरुषयोः मध्ये कोऽपि स्वतन्त्ररूपेण सृष्टेः कारणं भवितुं नार्हति । प्रकृतिपुरुषयो: संयोगवशात् प्रकृतित: महत्, महत: अहंकार:, अहंकारात् पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मन:, पञ्चतन्मात्राणि जातानि। एतेभ्य: पञ्चतन्मात्रेभ्य: पञ्चमहाभूतानि जातानि। इदमेव सांख्यदर्शने कथितं सृष्टितत्त्वम्। अस्य तत्त्वस्य उपस्थापना ''कुमारसम्भवम्'' महाकाव्यस्य द्वितीये सर्गेऽपि परिलक्ष्यते। तथाहि उक्तं महाकविना कालिदासेन —

''स्त्रीपुंसावात्मभागौ ते भिन्नमूर्ते: सिसृक्षया।
प्रसूतिभाज: सर्गस्य तावेव पितरौ स्मृतौ।।''[24]

सृष्टे: वासनावशात् सृष्टिकर्ता ब्रह्मा आत्मानं पुरुषरूपेण तथा प्रकृतिरूपेण विभक्तवान्। मिथुनरूपिणः अस्यांशस्य उत्पत्तेः महाकविः तं कदापि पितृरूपेण कदापि मातृरूपेण उपस्थापितवान् उपमाप्रयोगेन।
पतञ्जलिकृतस्य योगसूत्रस्य समाधिपादस्य प्रथमे सूत्रे उक्तम् – "अथ योगानुशासनम्।"[25] इतःपरं व्यासभाष्ये उक्तं योगः समाधिः अर्थात् योगः भवति समाधिः। स च सार्वभौमचित्तस्य धर्मः। योगिनः प्रधानलक्ष्यं हि समाधिलाभः । कुमारसम्भवम्' महाकाव्येऽपि महाकवि: कालिदास: तस्य लेखनीस्पर्शेण मालोपमालंकारेण महायोगिन: महादेवस्य समाध्यवस्थां सुन्दरतया उपस्थापितवान्। महेश्वरस्य यादृशी ध्यानावस्था कालिदासेनोपवर्णिता सा वस्तुत: समाधेरेव नामान्तरम्। तदुच्यते—

''अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम्।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम्।।''[26]

अस्य श्लोकस्य अर्थो भवति शरीरमध्यस्थानां वायूनां निरोधात् सः महेश्वरः वृष्टिविहीनो मेघवत्, तरङ्गहीनः समुद्रवत्, वायुशून्यस्थाने निश्चलप्रदीपवत् प्रतीतोऽभवत्।

अस्मिन् श्लोके पार्वती योगावस्थापन्नं ध्यानमग्नं शिवम् अपश्यत् ।कीदृशं शिवं अपश्यत् इति जिज्ञासायाम् उच्यते – वृष्टेः प्राक् घनश्यामः जलवाहो वा सुस्थिरः तिष्टति वर्षणविहीनात् तादृशं शिवम् अपश्यत् । एवं वृष्टेः प्राक् जलाधारः ह्रदं वा यादृशम् अनुद्भूततरङ्गं दृश्यते तादृशं महादेवम् अपश्यत् । किञ्च निर्वातदेशे प्रदीपः यथा निष्कम्पः तिष्टति तादृशं शिवम् अपश्यत् । वस्तुतः शिवस्य एतादृशी अवस्था तस्य ध्यानावस्थायां देहान्तश्चराणां प्राणादिवायूनां निरोधात् सञ्जायते ।

योगदर्शने अष्टयोगाङ्गेषु अन्यतमं हि ध्यानम् । ध्यानसमये मन: इन्द्रियाणि च योगिन: अधीने तिष्ठन्ति अर्थात् इन्द्रियाणि मनश्च शान्तरूपेण निश्चलरूपेण च विद्यन्ते। योगिन: इच्छानुसारेण मन: इन्द्रियाणि च कार्यं कुर्वन्ति। ईदृशी वर्णना योगशास्त्रेऽपि अस्ति। महाकवि: कालिदास उपमामाध्यमेन योगिन: ध्यानस्य एतादृशीं वर्णनां कृतवान्। कुमारसम्भवमिति महाकाव्यस्य तृतीयसर्गे ४७ संख्यके श्लोके महायोगिन: महेश्वरस्य ध्यानस्य वर्णनावसरे कालिदासेन यत् प्रकाशितम् ।तदुच्यते-

''किञ्चित्प्रकाशस्तिमितोप्रतारैर्भ्रूविक्रियायां विरतप्रसङ्गै:।
नेत्रैरविस्पन्दितपक्ष्मालैर्लक्ष्यीकृतघ्राणमधोमयूखै:॥''[27]

ध्याने उपविष्टस्य महादेवस्य त्रीणि नेत्राणि ईषत्प्रकाशितानि, निश्चलानि, उग्रकनीनिकायुक्तानि, भ्रूविक्षेप-प्रसक्तिरहितानि, स्पन्दनरहितानि,नेत्ररोमावली-विशिष्टानि आसन्। एतेन अवगम्यते यत् महादेवः सम्पूर्णरूपेण ध्याने समाविष्टः आसीत् ।

उपर्युक्तात् आलोचनात् वक्तुं शक्यते यत् महाकविः कालिदासः यथा उपमाप्रयोगे सिद्धहस्तः आसीत् तथा तया उपमया सांख्ययोगतत्त्वानि परिवेशयितुमपि स निपुणः आसीत् । एतेन अवबोध्यते यत् कालिदासस्य न केवलं काव्यशास्त्रे अपि तु दर्शनशास्त्रे निपुणता प्रशंसनीया ।

**संदर्भ सूची**


1. अग्निपुराणम्, ३३९/१०
2. अप्पयदीक्षितः, चित्रमीमांसा, सम्पादकः- कालिकाप्रसादशुल्कः, संस्करण- १९६५, पृष्ठाङ्क:४१
3. भरताचार्य:,नाट्यशास्त्रम्
4. कालिदास:, रघुवंशम्, १३/६०, संस्करण- २०२०
5. ईश्वरकृष्ण:, सांख्यकारिका, कारिका- २२
6. कालिदास: रघुवंशम्, १०/३८, संस्करण- २०२०
7. ईश्वरकृष्ण:, सांख्यकारिका, कारिका- १३
8. कालिदास: रघुवंशम्, ८/२१
9. ईश्वरकृष्ण:, सांख्यकारिका, कारिका- १२
10. ईश्वरकृष्ण:, सांख्यकारिका, कारिका- १३
11. कालिदासः,रघुवंशम् (९/७४)
12. रघुवंशम्, सम्पा. ड. श्रीकृष्णमणि त्रिपाठी, संस्करण- २०२०, पृष्ठाङ्क: ३११
13. कालिदास:, कुमारसम्भवम्, २/१३
14. ईश्वरकृष्ण:, सांख्यकारिका, कारिका- १९
15. कालिदास:, रघुवंशम्, ४/६०,
16. रघुवंशम्, सम्पा. ड. श्रीकृष्णमणि त्रिपाठी, संस्करण- २०२०, पृष्ठाङ्क: १२७
17. पतञ्जलिः, योगसूत्रम् (१.२८)
18. कालिदासः, कुमारसम्भवम्, ३/४५
19. कालिदास:, कुमारसम्भवम्, सम्पा. ड. सुधाकर मालवीय:, संस्करणम् -, पुनर्मुद्रित, वि. सं २०७५, सन् - २०१८, पृष्ठाङ्कः - ८३
20. कुमारसम्भवम्, सम्पादकः- ड. सुधाकर- मालवीयः, पृष्ठाङ्कः ८२
21. पतञ्जलिः, योगसूत्रम् (२.२८)
22. कालिदासः, कुमारसम्भवम्, १७/४७
23. कालिदास:,रघुवंशम्, १०/१७
24. कालिदास:, कुमारसम्भवम्, २/७
25. योगसूत्रम्, समाधिपाद(१.१)
26. कालिदास:, कुमारसम्भवम्, ३/४८
27. कालिदास:, कुमारसम्भवम्, ३/४७